# सन्धिः

प्रस्तुतकर्ता

डॉ. कुलदीपशर्मा
सहायकाचार्यः,
शिक्षाशास्त्रविभागः,
राष्ट्रियसंस्कृतसंस्थानम्, जयपुर-परिसरः, जयपुरम्

# सन्धिः

स्वरसन्धिः– स्वरस्य स्थाने आदेशः

1 यण्–सन्धिः
2 यान्तवान्तादेशसन्धिः – अत्र पूर्वस्य शब्दस्य अन्तिमस्वरे आदेशो भवति

3 गुणसन्धिः
4 वृद्धिसन्धिः
5 सवर्णदीर्घसन्धिः
6 पूर्वरूपसन्धिः
7 पररूपसन्धिः – अत्र पूर्वशब्दस्य अन्तिस्वरस्य उत्तरशब्दस्य च स्थाने एकादेशो भवति।

8 प्रकृतिभावः – अत्र आदेशस्य अभावो भवति।

# यण्–सन्धिः

- इ/ई + असवर्णस्वरः = य्
- उ/ऊ + असवर्णस्वरः = व्
- ऋ/ऋॄ+असवर्णस्वरः = र्
- लृ + असवर्णस्वरः = ल्

- प्रत्येकम् = प्रति+एकम्
- नद्यत्र = नदी+अत्र
- मन्वन्तरम् = मनु+अन्तरम्
- वध्वागमनम् = वधू+आगमनम्
- पित्रिच्छा = पितृ+इच्छा
- क्रिति = कॄ+इति
- घस्लादेशः = घस्लृ+आदेशः

- यद्यपि सुध्युपास्यः इत्यपि इत्याह प्रत्येकम् प्रत्युपकारः मात्रनुमतिः गुर्वादेशः शिश्वैक्यम् अन्वयः जनन्याह प्रत्यवदत् वस्त्राण्युत्पादयति व्यसनेष्वासक्तम् पार्वत्यधुना भवत्वधुना स्मराम्यहम् नास्त्यसाध्यम् इत्याक्षिप्तः साध्विदम् इत्याचरति प्रत्युपकारः मन्वादेशः अन्वादेशः।

# यान्तवान्तादेशसन्धिः

- ए+स्वरः = अय्
- ऐ+स्वरः = आय्
- ओ+स्वरः = अव्
- औ+स्वरः = आव्

- हरे+ए = हरये
- नै+अकः = नायकः
- विष्णो+ए = विष्णवे
- पौ+अकः = पावकः

- शयनम् नयनम् चयनम् भवति करावेतौ फलयिच्छा कटयुपवेशनम् बालावोजस्विनौ छात्रावागतौ तस्यायिदम् शिक्षकावुदारौ देवायुत्तमौ

- विशेषः = यदा ए, ऐ, ओ, औ इत्येते पदान्ते भवन्ति, तदा अयादिसन्धौ यकारस्य वकारस्य च लोपो विकल्पेन भवति। लोपात्परं सन्धिः न भविश्यति। यथा–
- हरे+इह = हरयिह/हर इह (गुणसन्धिः न भविष्यति)
- तस्मै+आगमनम् = तस्मायागमनम्/तस्मा आगमनम् (सवर्णदीर्घसन्धिः न भविश्यति)
- भानो+आदिश = भानवादिश/भान आदिश (सवर्णदीर्घसन्धिः न भविष्यति)
- देवौ+आयातौ = देवावागतौ/देवा आगतौ (सवर्णदीर्घसन्धिः न भविष्यति)

- वि”ोषः – पदान्तात् एकारात् परे पदान्तात् ओकारात् च परे यदा ह्रस्व अकारः आगच्छति, तदा पूर्वरूपं भवति, यथा–
- प्रथमे अध्याये = प्रथमेऽध्याये
- प्रथमो अध्यायः = प्रथमोऽध्यायः

- वि”ोषः – यदा ओ, औ इत्यनयोः परे एतादृशः प्रत्ययः समायाति, यस्य आरम्भः यकारेण भवति, तदा स्वरैः विना अपि ओकारस्य स्थाने अव् औकारस्य च स्थाने आव् इति आदेशौ भवतः। यथा–
- गो+यम् = गव्यम्
- नौ+यम् = नाव्यम्

# गुणसन्धिः

ए, ओ, अर्, अल्

- अ/आ+इ/ई = ए
- अ/आ+उ/ऊ = ओ
- अ/आ+ऋ/ॠ = अर्
- अ/आ+लृ = अल्

- गण+ईशः = गणेशः
- सूर्य+उदयः = सूर्योदयः
- सप्त+ऋषयः = सप्तर्षयः
- तव+लृकारः = तवल्कारः

- उपेन्द्रः सुरेशः, तथेति, रमेशः, हितोपदेशः गंगोदकम्, रम्भोरुः, नवोढा, महर्षिः, योगर्षिः, देवर्षिः, प्राचीनोक्तिः, परोपकारः, प्रश्नोत्तरम्, रामेश्वरः, कृष्णर्द्धिः, पुरुषोत्तमः, दोषोपेतम्, नेति, राजर्षिः, धीरोद्धतः, ज्ञानस्योदयः, देवस्योक्तिः, विचारोत्तेजकः, शीतोत्पन्नम्, चन्द्रोदयः, सुलभोपायः, शिक्षणस्योद्देश्यम्, जनस्योदरम्, वसन्तोत्सवः, मदोत्कटः, गर्वोन्मत्तः, जिह्वोत्कृष्टा।

# वृद्धिसन्धिः

ऐ, औ, आर्, आल्

- अ/आ+ए/ऐ = ऐ = सदैव, महैश्वर्यम्
- अ/आ+ओ/औ = औ = तस्यौदनम्, ममौषधम्
- अकारान्तात्/आकारान्तात् उपसर्गात् परे ऋकारादौ धातौ परे = आर् उपार्च्छति
- अकारान्तात्/आकारान्तात् उपसर्गात् परे ऌ = आल् = उपाल्कारीयति
- अद्यैव, तवैव, तण्डुलौदनम्, देवैश्वर्यम्, महौषधिः, विद्यैश्वर्यम्, ममैव, मैवम्, कृष्णैकत्वम्, प्रथमैकवचनम्, तदैकदा, यथैव, यदैव, राष्ट्रीयैक्यम्, परमौदार्यम्, रक्तौषधम्, तत्रैव, देवौदार्यम्, गङ्गौघः, महौत्सुक्यम्, नैव, कृत्वैतत्, देवतैषा।
- वि''ेषः – अधोलिखितोदाहरेणेषु गुणस्थाने अपवादरूपेण वृद्धिः भविष्यति–

  प्र+ऊहः= प्रौहः, प्र+ऊढः= प्रौढः, स्व+ईरः=स्वैरः,

  अक्ष+ऊहिनी=अक्षौहिणी, सुख+ऋतः= सुखार्तः

# सवर्णदीर्घसन्धिः

आ, ई, ऊ, ॠ

- अ/आ+ अ/आ = आ
- इ/ई + इ/ई = ई
- उ/ऊ + उ/ऊ = ऊ
- ऋ/ॠ+ऋ/ॠ = ॠ

- अल्पायासः, विद्यागमः, श्रीशः, कपीशः, रसास्वादनम्, नान्यथा, सुरारिः, दयार्णवः, लघूर्मिः, सूपलब्धः, इतीदम्, रवीन्द्रः, क्षितीशः, गिरीन्द्रः, वधूत्सवः, देवालयः, विष्णूदयः, सतीशः, गुरूपदेशः, पितॄणम्, होतॄकारः, मधुराक्षरम्, ज्ञानातुरः, अस्तीति, अद्यापि, नास्ति, देवासनम्, देवांशः, प्रियांशः, चित्रांकनम्, फलास्वादनम्, कॄकारः।

# पूर्वरूपसन्धिः

- पदान्तात् एकारात् पदान्तात् ओकारात् च परे ह्रस्वे अकारे पूर्वरूपसन्धिः भवति।
- ए/ओ+अ= एऽ/ओऽ
- तेऽपि, कोऽपि, सुन्दरेऽम्बरे, मार्गेऽस्मिन्, गृहेऽस्मिन्, रामोऽतिथिः, सोऽवदत्, सोऽयम्, अन्तेऽपि, वृक्षेऽपि, लोकोऽयम्, सुदीर्घेऽहनि।

# पररूपसन्धिः

- अवर्णान्तात् उपसर्गात् एकारादौ/ओकारादौ धातौ परे एकारः/ओकारः पूर्वपरयोः स्थाने एकादेशो भवति। वृद्धिसन्धेः अपवादोऽयम्। यथा–
- प्र+एजते= प्रेजते (एजृ दीप्तौ)
- उप+ओणति=उपोणति (ओणृ अपनयने)

# (प्रगृह्य)–प्रकृतिभाव:

- ईकारान्तम्, ऊकारान्तम् एकारान्तं च द्विवचनरूपं प्रगृह्यसंज्ञकं भवति। ततः परं स्वरे यथावत् रूपं तिष्ठति। यथा– मुनी+इमौ= मुनी इमौ
- कवी एतौ, गुरू इमौ, लते इमे, पचेते इमौ।

- एवमेव ओकारान्तात् आकारान्तात् च अव्ययात् परे अपि प्रकृतिभावसन्धिः भवति।
- यथा– अहो+अत्र = अहो अत्र
- आ+एवम् = आ एवम्

# व्यञ्जनसन्धिः

व्यञ्जनस्य स्थाने आदेशो भवति।

श्चुत्वसन्धिः–

- यदि सकारस्य तवर्गस्य वा पूर्वे परे वा शकारः चवर्गः वा समागच्छति, तर्हि सकारस्य शकारे तवर्गस्य च चवर्गे परिवर्तनं भविष्यति। यथा–
- रामश्+शेते= रामश्शेते, सत्+चरितम्= सच्चरितम्
- सच्चित्, सज्जनः, कश्चित्, एतज्जलम्, उच्चारणम्, बृहच्छत्रम्, तपश्चर्या, तच्चिन्त्यम्, प्रतिपच्चन्द्रः, बृहच्छिद्रम्, भूभृच्चलति, कियच्चलति, एतज्ज्ञात्वा, तच्च, उज्ज्वलम्, रामश्च, सुहृज्जगाम।
- अपवादः– विश्नः (विश्+नः), प्रश्नः (प्रश्+नः)

# ष्टुत्वसन्धिः–

- यदि सकारस्य तवर्गस्य वा पूर्वे परे वा षकारः टवर्गः वा समागच्छति, तर्हि सकारस्य षकारे तवर्गस्य च टवर्गे परिवर्तनं भविष्यति। यथा–
- रामस्+षष्ठः= रामष्षष्ठः, बृहत्+टीका= बृहट्टीका
- उट्टंकनम्, उड्डयनम्, तट्टीका, आकृष्टः, इष्टः, उड्डीनः, विष्णुः (विष्+नुः), कृष्णः, रामष्टीकते, दुष्टः, स्याट्टंकनम्, यट्टीका।

# जश्त्वसन्धिः

- पदान्ते प्रत्येकमपि वर्गस्य आद्यचतुरक्षराणां (अन्तिमाक्षरं विहाय अर्थात् क,ख,ग,घ, च,छ,ज,झ, ट,ठ,ड,ढ, त,थ,द,ध, प,फ,ब,भ) स्ववर्गस्य तृतीयो वर्णो जायते। यथा–
- वाक्+ईशः= वागीशः
- चिदानन्दः, षडेव, षडाननः, सुबन्तः, अजन्तः, जगदीशः, वाग्व्यवहारः, अज्वर्णः, वाग्देवता, षड्दर्शनानि, उद्गमः, तद्यथा, सद्गुणः, प्रागेव, सम्यगधिगतम्, महदिदम्, तावदेतत्, स्वर्गादपि, तदपि, यदपि, जगद्गुरुः।

# अनुनासिकसन्धिः

- पदान्तात् यर्–वर्णात् (हकारं परित्यज्य सर्वेऽपि व्यञ्जनवर्णाः) परे यदि अनुनासिकवर्णः (प्रत्येकमपि वर्गस्य अन्तिमाक्षरम्) स्यात्, तर्हि यर्–वर्णस्य स्थाने स्ववर्गस्य पंचमो वर्णो भविष्यति। यथा– तत्+न= तन्न, वाक्+मयम्= वाङ्मयम्, षट्+मुखः= षण्मुखः
- चिन्मयम्, दिङ्निर्देशः, एतन्मंगलम्, त्वन्निवासः, विद्युन्माला, तन्नयनम्, तन्मण्डलम्, सन्नागरिकः, जगन्नाथः, विद्वन्नगरम्, तन्नयः, तन्मूलम्, यन्मयः, स्वाध्यायान्मा प्रमदः, तस्मान्नगरात्।

# अनुस्वारसन्धिः

- व्यञ्जने परे पदान्ते स्थितस्य मकारस्य अनुस्वारो भवति।
- रामं वन्दे।
- सत्यं वद, धर्मं चर, गृहं गच्छामि, भाषणं श्रुत्वा, मातरं वन्दे, शान्तं पापम्, देशं गच्छति।
- (स्वरे परे पदान्तेवाक्यान्ते वा मकारे परिवर्तनं न भवति। यथा अहम् आगच्छामि, शोभनं भाषणं श्रुतम्।)

# परसवर्णसन्धिः

- अनुस्वारात् परे यदा यय्–प्रत्याहारस्य वर्णः समायाति (अर्थात् श,ष,स,ह इत्येतान् विहाय सर्वेऽपि व्यंजनवर्णाः), तदा अनुस्वारस्य परसवर्णो (परे स्थितस्य वर्णस्य वर्गस्य अन्तिमाक्षरम्) जायते। यथा–
- अं+कितः= अङ्कितः
- भाङ्का, तृणञ्चरति, गृहङ्गच्छति, इत्थङ्कृत्वा, झञ्झावातः, सम्बन्धः, दिनाङ्कः, शङ्करः, सम्भ्रमः, सङ्गतिः, सञ्चरति, सन्देशः, मन्दिरम्, सम्भावना, कण्टकम्, इङ्गितम्, टङ्कनम्, कङ्कणम्।

# तुगागमसन्धिः

- ह्रस्वात् स्वरात् छकारे परे तयोर्मध्ये चकारागमः भवति, दीर्घात्पदान्तात्तु विकल्पेन भवति।
- अनिवार्यरूपेण–
- वृक्ष+छाया= वृक्षच्छाया।
- संस्कृतच्छात्रः, मण्डनमिश्रच्छात्रावासः, श्वेतच्छत्रम्, प्राकृतच्छाया, मातृच्छाया, दीर्घच्छुरिका।
- वैकल्पिकरूपेण–
- शिखरिणी+छन्दः= शिखरिणीच्छन्दः, शिखरिणीछन्दः

# विसर्गसन्धिः

अः+स्=स्स्, ः+ष्= ष्ष्, ः+श्=श्श्= बालास्सन्ति, रामश्शाष्ठः, शान्तिश्शान्तिः

अः+क/प=स् यशस्करी विद्या, वाचस्पतिः,

अः+ ग, घ, ङ,

ज, झ, ञ,

ड, ढ, ण,

द, ध, न,

ब, भ, म,

य, र, ल, व, ह = ओ

रामो गच्छति, रामो घटं पश्यति।

कृष्णो जयं प्राप्नोति, देवो न जानाति कुतो मनुष्यः।



# धन्यवादः

kuldeepsharma.rsks@gmail.com